मुद्रकः—**रघुनाथ रामचंद्र बखले,** मुंबईवैभव प्रेस, सर्व्हंट्स ऑफ इंडिया सोसायटीज् होम, सँढर्स्ट रोड, गिरगांव–मुंबई.

---

प्रकाशक—**दत्ताराम विनायक मुळगांवकर** प्रोप्रायटर, गोपाळ नारायण कंपनी, बुकसेलर्स, काळबादेवी रोड, मुंबई.



S. R. Ramaswamy

श्रीअभिनवकालिदासविरचिता

# भागवतचम्पूः ।

कल्याणं नः प्रभूतं[1] कलयतु ललितालाप[2]शैलेशबाला
लीला[3]जालानुकूला शिशिरकर[4]कला भानुमाला[5]जटाला ॥
एषा शेषाहिभूषा[6] परिकलितसुधापूरधारानुकारा
भद्रामुद्रा विनिद्रा पुरहरणविधौ कापि कारुण्यपूर्णा १

प्रालेया[7]चलभागधेयभवनं कल्याणजालास्पदं
जाटाटीश[8]तपःफलं किलकिलल्लीलाशुकाह्लादितम् ॥
बिभ्राणं परिमौलि[9] कंचन सुधाधाराधरं सादरं
तन्मे भद्रसमुद्रमाकलयतादानन्दकन्दं महः २

कस्त्वं घोरविलोचनोऽपि भुजगोत्तंसः कपाली जटी
देव्याः शासनमन्तरेण भगवन्नन्तःपुरं मा गमः ॥
इत्थं द्वारि निवारितं पुरहरं निध्याय[10] दौवारिकै-
र्यन्मातर्विदधासि मन्दहसितं दद्यात्तदिष्टानि नः ३

अन्योन्यं विजयेषिणोर्विहसतोः सानन्दयोः साहसे
सामोदादितरेतरव्यति[11]करादुद्भूतरोमाञ्चयोः ॥

---

१ प्रभूतमतिशयेन । २ ललितो मनोहरः आलापः स्वरो यस्या एतेनाकाशरूपत्वम् एतादृशी शैलेशस्य महेन्द्राचलस्य बाला कन्या । ३ लीला जाले अनेकासु क्रीडासु अनुकूला । एतेन जलत्वम् । ४ शिशिरकराणां या कला तद्रूपा । ५ भानुमाला भानूनां द्वादशसूर्याणां माला समूहः एताभ्यां तेजस्त्वम् । ६ शेषाहिभूषा शेषसर्पभूषणा पृथ्वी वा । ७ प्रालेयाचलो हिमाचलः । जाटाटीशः शङ्करः । ‘अहिर्बुध्नो जटाटीश’ इति निघण्टुसारे स्वार्थे अण् । ९ मस्तकोपरि । १० प्रार्थनां कृत्वा । ११ परस्परप्रीत्या ।

तदनन्तरमितःपरमन्तःपुरदारेषु पुरगोपुरेषु च यथापुरमावृतेषु बालिकाकलकलमाकलय्य निलयपालिकाः[१] सत्वरमवबुध्य कंसाय सुतावतरणं न्यवेदयन्[२] । सोपि तद्वचननिशमनसमसमयमेवाशनिहतधराधर[३][४] इव परमधिगतहृदयवेदनः समधिकलितनिजविलयहेतुरन्तक[५][६] इति सातङ्कः[७] पङ्कनिमग्नपद इव द्विपः कृत्याकृत्यविवेकमकलयन्नेव[८] कथमप्यरिष्टमासादयन्[९] व्यापादनाय[१०] देवकतनयां[११] तनयामयाचत[१२][१३] । सापि पापाशयमेनमवगत्य प्रत्यवादीत् ।

भूयांसो विहताः सुता मम सुधाधामोपमानानना[१४]
योग्येयं चरमात्मजेति[१५] सपदि प्रेमा[१६] समालम्ब्यताम् ॥
क्लेशं मा नय मानयस्व भगिनीं दूनामनूनाधिना[१७][१८]
नैवोज्झन्ति[१९] धराधरालिमशनिप्लोषेपि[२०] धाराधराः[२१] ७४

एवमसकृदतिकरुणमालपन्तीमेनामतिदीनाक्षरमुखरितकर्णान्तरमानकदुन्दुभिमप्यवगणय्य[२२] स्तनंधयामस्तोकवेगमादाय[२३] परिशिलातलमुत्पात्य[२४] पातयितुमारभत ।

अबला[२५] यद्देवकजा युक्तमसौ मा शृणोतु तद्वाणीम् ॥
आनकदुन्दुभिशब्दं नाश्रौषीदेष विस्मयायैतत् ७५

ततः सद्य[२६] एव सापि त्रिलोकजनमोहनकुशला निजकायचालनकौशलेन सविलासमंतरिक्षवर्त्मनि[२७][२८] समुत्प्लुत्य समधिगम्य च सुरवरवन्द्यमानचरणारविन्दमतिविशदस्मितमुखाम्बुजमम्बिका-

---

१ निलयपालिकाः द्वारपालिकाः । २ न्यवेदयन् अज्ञापयन् । ३ तद्वचननिशमनसमसमयमेव तन्नाम पुत्रोत्पत्तिविषयकं वचनं तच्छ्रवणसद्यःकाल एव । ४ अशनिर्वज्रं तेन हतस्ताडितो धराधरः पर्वतः तद्वत् । ५ विलयो मरणम् । ६ अन्तको नाशयिता । ७ सातङ्कः आतङ्केन शंङ्कया भीत्या वा सहितः । ८ अकलयन् अजानन् । ९ अरिष्टं सूतिकागृहम् । १० व्यापादनाय मारणाय । ११ देवकतनयां देवकीम् । १२ तनयां कन्याम् । १३ अयाचत द्विकर्मक प्रयोगोयम् ‘ दुह्याच ’– इति परिगणने विद्यमानत्वात् । १४ सुधाधामोपमानाननाः सुधाया धाम स्थानं चन्द्रः स उपमानं येषां तानि आननानि मुखानि येषां ते । १५ चरमात्मजाऽन्तिमा कन्या । १६ प्रेमा आनन्दः प्रीतिर्वा । १७ दूनां दुःखिताम् । १८ अनूनाधिना अतिशयमनोव्यथया । १९ उज्झन्ति त्यजन्ति । २० अशनिप्लोषेपि विद्युद्दग्धेऽपि । २१ धाराधरा मेघाः । २२ आनकदुन्दुभिं वसुदेवं पक्षे आनकेन पटहेन सहितो दुन्दुभिः ( वाद्यं ) तम् । २३ स्तनंधयां स्तनं धयति पिबतीति स्तनंधयां कन्याम् । २४ परिशिलातलं शिलातले इत्यर्थः । २५ अबलास्त्रीपक्षे निर्बला । २६ सद्यस्तत्क्षणे । २७ सविलासम् साहजिकं यथा तथा । २८ अतिशयेन विशदं शुभ्रं स्मितेन इषद्धास्येन मुखाम्बुजं यस्मिन्वा यस्य तत् ।



रूपविस्मयमानमेनमुग्रसेनतनयमवादीत्[१] । अयि भो वैधेयकुलतिलक[२] किमनया बालिशया[३] विबलया[४] मया निबर्हितया[५] । समुद्भूत एव किंतु भुवि मदर्वागेवाखर्वपराक्रमः[६][७] कोपि तव मर्दनाय[८] जनार्दनांशो[९] निरङ्कुशमहिमा[१०] सावधानमेतदवधारयतु[११][१२] भवान् ततस्तादृशनितान्तारुन्तुदतद्वचनपवनझर्झरितहृदयकुहरो[१३] नृशंसोपि[१४] कंसः कमपि निरवधि[१५] कर्कशदशाविशेषमधिगत्य[१६] नियत्या[१७] वसुदेव एव शरणीकरणीय इति धियमयासीत् ।

प्राप्तोपि पुत्रार्दनवज्रघातान्[१८] कंसाम्बुवाहाद्वसुदेवशैलः[१९]
बभार तस्यैव वचोम्बुधाराः शीर्षेण[२०] गुर्वी खलु जीवनाशा ७६

सा च देवकतनयापि सान्त्ववचनगर्भिताभिर्गर्वार्थाभिरुक्तिभिरभ्यर्थमानं सानुशयमाशयसंधुक्षणविचक्षणा[२१] तत्क्षणं तमेव[२२] पूर्णमानन्दयामास । एवं प्रसादमेदुरहृदयारविन्दौ[२३] दम्पती पुण्डरीकलोचनविलोकनविकलसकलबन्धावपि[२४][२५] विगलितनिगलबन्धावाबाधाय सदयाभ्यां ताभ्यामाश्वासितोपि स बहु दूयमानमना एव स्वसदनमाससाद । ततः स समुपचितरुचिररुचिपरिचय-[२६]

---

१ उग्रसेनतनयं कंसम् । २ वैधेयकुलतिलक । वैधेयाः मूर्खाः ‘ अज्ञे मूढयथाजातमूर्खवैधेयबालिशा ’ इत्यमरः । तेषां कुलानि समूहाः तेषां तिलकोग्रगण्यः । मूर्खाग्रेसर इत्यर्थः । ३ बालिशया बालया ( शिश्व्या ) ‘ बालिशश्च शिशौ मूर्खे ’ इति मेदिनी । ४ विबलया अशक्तया । ५ निबर्हितया वधं प्रापितया ‘ प्रमापणं निबर्हण ’मित्याद्यमरः । ६ मदर्वाक् मत्पूर्वमेव । ७ अखर्वपराक्रमः दीर्घपराक्रमः । ८ मर्दनाय नाशकरणाय । ९ जनार्दनांशो दुष्टाञ्जनानर्दयति पीडयतीति जनार्दनः ‘ नन्दिग्रहि ’–इत्यादिना नन्द्यादित्वात्ल्युः । तस्यांशः अंशरूपः इदं प्रायिकं कृष्णस्तु भगवान्स्वयमित्युक्तत्वात् । परे तु विष्णोरंशेपि परिपूर्णत्वं विद्यत एव ‘ पूर्णमदः पूर्णमि ’त्यादिश्रुतेः स्पष्टं ‘ स्वाप्ययादि ’ति सूत्रभाष्ये । १० स्वनन्त्रमहिमा । ११ सावधानं अवधानेन सह यथा तथा दत्तचित्त इत्यर्थः । १२ श्रुत्वा गृह्णातु । १३ तादृशनितान्तारुन्तुदतद्वचनदन्तुरितहृदयकुहरः तादृशं निन्तान्तमतिशयेन यदरुन्तुदं मर्मभेदकं तस्या मायाया यद्वचनं तेन दन्तुरितं व्याप्तं हृदयकुहरं ( हृद्रूपा गुहा ) यस्य सः । १४ नृशंसः क्रूरः । १५ निरवधि अतिशयेनेत्यर्थः । १६ कर्कशः कठोरो यो दशाविशेषोऽवस्थाविशेषस्तम् । ‘ दशावस्थादीपवर्त्योः वस्त्रान्ते भूम्नि योषिति ’ इति मेदिनी । १७ नियत्या नियमेन । १८ पुत्रार्दनवज्रघातान् पुत्रनाशदुःखवज्रताडनानि । रूपकालंकारः १९ अम्बुवाहा मेघाः । २० शीर्षेण मस्तकेन । २१ आशयसन्धुक्षणविचक्षणा आशयप्रकटकारिणी । २२ तमेव कंसमेव । उक्तं श्रीमद्भागवते ‘ एवमेतन्महाराजे ’त्यादिना । २३ मेदुरं प्रसन्नम् । २४ पुण्डरीकलोचनः श्रीकृष्णः । २५ विकला विगताः । २६ समुपचितेति । सम्यगुपचिता एकीभूता रुचिरा मनआह्लादकारिणी या रुचिः कान्तिः ‘ स्युः प्रभारुग्रुचिस्त्विड्भे ’त्यमरः तस्याः परिचयः संचयो यो हिमकरश्चन्द्रः तद्विरहेण वियोगेन यो विधुरभावः तेन प्राप्ता या कृशता तया स्वकीयपतिकृशतयेत्यर्थः ।

हिमकराविरहाविधुरभावकृशतया तनुतां गतायां त्रियामायाममायमेव नानाविधपतगविततिकृतकलविरुतजालैरहर्मुखविधिविधेयमनुबोधयत्सु समंततो हरिदन्तरेषु च । किं नु स्वल्पपूर्वं पूर्वदिक्सर्वंसहाभृदवलम्ब्यमानभासुरमुकुरबिम्बमिदं किं नु वा तत्परिसरविस्मरकेसरवासरकमलाविलासकोकनदमाहोस्विदवनितलावतीर्णमधुसूदनपदसेवनाय बलिसदनसमुद्गतभुजगपरिबृढचूडाशोणरत्नमथवा रथाङ्गविहङ्गदूरीकृतविरहज्वलनज्वालाजालपटलमेव यद्वा द्विजराजवसुहरणसमुपगतमहाविगर्हणानिबर्हणाय वासरनरपतिकरदर्शितोद्रिक्ततप्तलोहफलकमित्यनेकविधमुच्चावचमल्पानल्पजनकल्पितोत्प्रेक्षे सहस्राक्षरक्षितादिगङ्गनालपनाम्बुजचुम्बिनि भगवति समुदञ्चति विवस्वति च दुर्यन्त्रितवृत्तिदुर्मन्त्रिभिराशु संमन्त्रयितुमन्तरपुरात्सभासमाजमधिगम्य निखिलमपि कर्णपुटपर्णलिखितं कपटबालिकासंलपितमभिनिवेद्य कथमत्र विधेयमित्यभिदधानस्तूष्णीमेव वृष्णिहितवर्धिष्णुं विष्णुं चिन्तयन् चिन्तादन्तुरितचेता एव यावदास तावतोपि स्वभावत एवापवित्रचरित्रास्तत्र च तन्नियन्त्रणपरतन्त्रा दुर्मन्त्रिणः सकलवसुमतीवास्तव्यस्तोकतरपृथुकमथनकृतानिश्चया-

१ तनुतां कृशताम् । २ त्रियामायां रात्र्याम् । 'त्रियामा क्षणदा क्षपे'त्यमरः। ३ अमायं स्वाभाविकमित्यर्थः । ४ विततिः परम्परा । ५ कल इति शब्दसमूहैः कलकलैरित्यर्थः । ६ अहर्मुखविधिविधेयं प्रातःकर्तव्यं कर्म । ७ हरिदन्तरेषु दिशामध्येषु । 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्चता' इत्यमरः । ८ सर्वमिति । सर्वंसहा पृथ्वी तां बिभर्ति यो मेरुपर्वतः समुद्रो वा तेनावलम्ब्यमानं धृतं तेजःपुञ्जं दर्पणाबिम्बम् । ९ तत्परिसरेति । तत्परिसरः मेरुपर्यन्तभूः 'पर्यन्तभूः परिसरः' इत्यमरः तस्मिन्विकिरितानि यस्य यत्केसराणि तेन वासरकमलाया दिवसलक्ष्म्याः विलासकोकनदं क्रीडाकमलम् । १० भुजगपरिबृढो भुजगश्रेष्ठशेषः तस्य चूडाशोणरत्नं मस्तकमाणिक्यम् । ११ रथाङ्गेति । रथाङ्गाश्चक्रवाका विहङ्गाः पक्षिणः तेन दूरीकृतं दूरे त्यक्तं विरहज्वलनज्वालाजालपटलं विरहाग्निज्वालासमूहः । १२ द्विजराजेति । द्विजराजश्चन्द्रः स एव वसुर्मणिस्तस्य हरणं चौर्यं तदर्थं समुपगतानां महाविगर्हणेन अतिभर्त्सनेन यन्निबर्हजो वधः तदर्थम् । पक्षे द्विजराशो ब्राह्मणः शेषं सुगमम् । १३ वासरेति । वासरो दिवसः स एव राजा तेन करेण किरणेन पक्षे हस्तेन दर्शितमुद्रिक्तं उपरिधारितं च तप्तं लोहफलकं लोहपट्टः । १४ सहस्राक्षेति । सहस्राक्ष इन्द्रः तेन रक्षिता (सदिक्पालो यस्याः) या दिक् सैवाङ्गना तस्या आलपनं मुखं (अम्बुजमिव) तस्य चुम्बिनि चुम्बयति । १५ समुदञ्चति उदयति । १६ विवस्वति सूर्ये । १७ दुर्यन्त्रिता दुष्टा वृत्तिर्वर्तनं यस्य स कंसः । १८ अन्तरपुरादन्तःपुरात् । १९ कर्णपुटपर्णलिखितम् कर्णपुटे एव पर्णे लिखितं । श्रुत्वा धृतम् । २० तन्नियन्त्रण परतन्त्राः कंसाज्ञाधीनाः । २१ सकलेति । सर्वा या वसुमती पृथ्वी तस्यां वास्तव्यं येषां ते पृथुकाः बालकाः 'पृथुकौ चिपिटार्भकौ' इत्यमरः । तेषां मथने नाशे कृतो निश्चयो यैः ।



श्चक्रीकृतपराक्रमाः स्वीकृतक्रव्यादक्रमाः क्रमशो निश्चक्रमुः । तदनु स चापि समञ्जसमासनार्हैः समाजमपहाय विसहाय एवान्तरागारमगाधगर्ह्यगोपदगोष्ठीनमभ्यगात् ।

**इतस्तु नन्दः सुतभावभाजः परस्य साक्षात्करणेन पुंसः**
**निर्वाणमापानकदुन्दुभेस्तु बन्धोऽभवच्चक्रधरे परोक्षे ७७**

युक्तमेवैतद्यद्धरिपदयोगे तमोनिवृत्तिस्तदयोगे तत्प्रवृत्तिरिति ।

**स्थाने तमादाय तदा यशोदाप्यमन्दमानन्दमविन्दतेति**
**हृदा मुदा यं परिरभ्य लीलालोलाविरागा यतयोपि भूताः ७८**
**बभूव चित्रं भगवत्प्रसङ्गान्मायावृताया अपि नन्दवध्वाः**
**सुखं निजानन्दममुष्य तत्त्वं ज्ञात्वापि नासीद्वसुदेवतन्व्याः ७९**

नन्दोपि तदनु नन्दनसमुदयसमुदञ्चितमुचिताहर्विहितमानन्दमनुभूयपयस्विनीशतमपरिमितमपि नानाविधवासःकनकालंकारनिचयमवनिगीर्वाणसाद्विधाय तोरणवितानपताकिकानिकायभूषितेषु निकेतनेषु दुन्दुभिपटहनिःसाणरणनमुखरीकृतमुखेषु हरिदन्तरे लास्यविलासलालसासु वेशमत्तकाशिनीषु श्रुतिरुजोपहाररसायनेषु गायनेषु विकीर्णसुमनोगणेषु सुमनोगणेषु च प्रकटितकल्याणागाधगाथेषु मागधेषु समुदितानन्दपल्लवेषु बल्लवेषु प्रवर्तितमङ्गलसूक्तजातेषु द्विजातेषु तत्क्षणमात्मजन्मनो जातकर्ममङ्गलं निर्वर्तयामास ।

**क्रमेण ववृधे शौरिर्धर्मो विग्रहवानिव**
**तथा दुर्विनयाङ्कूरः कंसस्य च निरङ्कुशः ८०**

अथ कदाचिदुपहारवितरणाय व्रजपरित्राणभरमखिलमपि निजमनुजीविजनाधीनं प्रविधाय

१ चक्रीकृतपराक्रमाः समूहीकृतपराक्रमाः । २ क्रव्यादाः राक्षसाः । ३ समञ्जसं तत्कालमेव । ४ विसहायः एक एव । ५ परस्य परब्रह्मणः । ६ प्रत्यक्षदर्शनेन । ७ परोक्षे अदृष्टे । ८ अमन्दमतिशयेन । ९ संन्यासिनोपि । १० ब्राह्मणेभ्यो दत्वेत्यर्थः । ११ निकायः समुदायः । १२ हरिदन्तरे दिशां मध्ये । १३ लास्यं नर्तनं विलासा आनन्दचेष्टाश्च तत्र लालसाः । १४ श्रुतिरोगहारे रसायनानीव । १५ विकीर्णाः वर्षिताः सुमनसां पुष्पाणां गणाः यैः एतादृशेषु । १६ सुमनोगणेषु देवसमूहेषु । १७ प्रकटिताः उक्ताः कल्याणयुक्ता अगाधाः अनन्ताः गाथाः पूर्वकथा यैः। १८ मागधाः स्तुतिपाठकाः । १९ बल्लवेषु गोपालेषु । 'गोपेगोपालगोसंख्यगोधुगाभरिबल्लवाः' इत्यमरः । २० प्रवर्तितं वक्तुमारब्धं मङ्गलसूक्तानां जातं समूहो यैस्तेषु । २१ द्विजातेषु ब्राह्मणेषु । २२ आत्मजन्मनः पुत्रस्य । २३ विग्रहवान् देहवान् । २४ निरङ्कुशः अव्याहतः । २५ उपहारवितरणाय राज्ञः समर्प्यमाणवस्तुदानार्थं । २६ व्रजपरित्राणभरम् गोकुलरक्षणाधिकारम् । २७ अनुजीविनो भृत्याः ।

समधिगतमधुरानगरसुपहृतसमस्तवस्तुस्तोमकृतावितरणतया परितोषितना[1]गरिकपरिवृढं सुहृल्लता
कन्दमिव नन्दमुपगतमाकर्ण्य वसुदेवः ससत्वरमदसीयमुदवसितमतिमोदेन तदानीमयासीत् ।

तावथ भ्रातरौ स्निग्धौ दैवात्कृतसमागमौ
परस्परं परिष्वज्य पप्रच्छतुरनामयम् ८१
भ्रातस्तनयसौख्येन मधुरेण विवर्धसे
जाताच्यु[2]तसुताशस्य यदच्युतसुतस्पृहा ८२
कुशली रौहिणे[3]योऽस्ति भवतः किमु सद्मनि
सुहृद्दैवाथ वा सिद्धा लोके मित्रगृहे मतिः ८३
तदर्पि[4]तकरस्याद्य नादे[5]यमिह किंचन
अतोऽर्हसि व्रजं गन्तुं कर्तुं नैवा[6]सनग्रहम् ८४
भ्रातर्व्रजमुपेक्षस्व नोत्पातशतसंकुलम्
विररामाभिधायेदं नन्दमानकदुन्दुभिः ८५

प्रमुदितहृदय विधाय शौरिं तद[7]भिहितं हितमाकल[8]य्य भूयः
भवनमनु ततश्चचाल नन्दः सममनुजीविभिरावृतो गवीशै[9]ः ८६
पूतना तदनु नन्दमन्दिरं पातनाय निखिलां[10]र्भसन्ततेः
यातनां[11] सुनिपुणा समाययौ दुर्जनार्दनविनाशनां[12]शया ८७

येयमवतंसितसितं[13]कंसशासना कमनीय[14]तमकामिनीरूपसंपदतिकम्पितं[15]वसुन्धरा धराधर[16]पयोधरा

१ परीति । परितोषितः संतोषितः नागरिकपरिवृढः नगरजनप्रभुः कंसो येन स एतादृशम् । २ अच्युतः परमेश्वरः पक्षे अच्युता अव्याहता । ३ बलरामः । ४ अर्पितकरस्य अर्पितः करो राजग्राह्यं द्रव्यं येन सः तस्य राज्ञः कंसस्य । ५ नादेयं नोपादेयम् । ६ आसनग्रहं कर्तुं स्थातुम् । ७ तदभिहितं तेन वसुदेवेन ज्ञापितम् । ८ आकलय्य ज्ञात्वा । ९ गवीशैर्गोपालैः । १० निखिलेति । निखिला सर्वा या अर्भानां बालानां संततिः समुदायः तस्याः पातनाय पातनं कर्तुम् । ‘ क्रियार्थोपपदस्ये ’ त्यादिना चतुर्थी । ११ यातना दुःखरूपा । १२ दुर्जनार्दनः परमेश्वरस्तस्य यद्विनाशनं नाशस्तस्य आशा इच्छा तया । १३ अवतंसितसितकंसशासना । अवतंसितं मस्तकोद्धृतं सितं तीक्ष्णं कंसशासनं कंसाज्ञा यया सा । १४ कमनीयतमा आतिशयेन सुन्दरा कामिनीरूपसंपत् स्त्रीस्वरूपश्रीर्यस्याः । १५ अतिशयेन कम्पिता वसुंधरा यया । १६ धराधर इव पर्वत इव पयोधरौ कुचौ यस्याः ।



द्रुततरमजेशादिसुरवर[1]परायणं नन्दभवनभूषणभूतमुपधिबाल[2]लीलाशालिनं वनमालिनमतिवेल[3]बाललीलाविलासविलोकनलालसतया करग्रहं गृहीत्वा तदीयमधुरतरभार[4]तीभरनिशमनपरवशानिजाशयेव कमपि कथमपि प्रमोदभरमभिनीय हाला[5]हलनिलयमानने स्तनं तदीये न्यवेशयदपाययच्च । सोऽपि नीलक[6]ण्ठवन्दितचरणारविन्दमखिललोकमोहनशिल्पविद्याविशारदमपि मामियमतिसंधा[7]तुमध्यवस्यतीति कौतुकेन तदीयच्छन्दमनुसंदधानस्तदीयमपरिमितं विषेण सह बलमपि प्राणसमीरणैः[8] सममेव भोगीश[9]भोगसुखशयनः श्रीभगवानसिस्वद[10]त् ।

यत्पूतनाप्राणसमीरधारामसौ स्तनास्वादमिषादधासीत्
चक्री[11] ततोऽसौ निरधारि किं तु चित्रं सुपर्णप्रणयत्वमस्मिन् ८८
सासीज्जग[12]त्प्राणधयी स चास्याः प्राणानिलानेव निनाय नाशम्
तुल्येऽपराधे मरुतां हितो[13]भूदसौ रिपुः सेति विचित्रमेतत् ८९
निपीय तस्या गरला[14]यतानि न विव्यथे तानि पयांसि सोऽयम्
आवासभूमिर्विष[15]धेः सुतायास्तस्यैव यस्याप्ततमेषु वित्तम् ९०
अलमलमितिवादिनी ततोऽसौ झटिति विभिन्नसम[16]ग्रसंधिबन्धा
अधिधरणि पपात नष्टसंज्ञा गिरिरिव दुःसहरौद्रवज्रघातात् ९१

सपदि परशुभिन्नं गात्रमाधाय घोरं कलयति शिशुरक्षां रक्षिणां चक्रवा[17]ले

१ अजेशादीति । अजो ब्रह्मा ईशः शिवः तौ आदी येषां ते च ते सुरास्तेषां परायणं आश्रयः । २ उपध्या बाललीलाधारि नहि वस्तुत इत्यर्थः । ३ अतिवेलं अतिमात्रं बाललीलाया विलासाः तेषां विलोकनस्य लालसता इच्छा तया । ४ भारती वाणी । ५ हालाहलं नाम विषं तस्य निलयं स्थानम् । ६ नीलकण्ठेन पीतहालाहलेन शिवेन वन्दितं चरणारविन्दं यस्य तम् । रामभजनेनैव शिवप्राशितविषशान्तिरभूत् । ७ अतिसन्धातुं मोहितुम् । ८ प्राणादिवायुभिः पंचप्राणैरित्यर्थः । ९ भोगीशः शेषः ‘ उरगः पन्नगो भोगी ’ त्यमरः । स एव भोगः शय्या ‘ भोगः शय्याहृदोरे’ष्विति कोशात् । तत्र सुखेन शयनं यस्य । १० असिस्वदत् पीतवान् । ११ चक्री सर्पः । पक्षे चक्रं विद्यते यस्य सः विष्णुः । ‘ चक्री जालिकभित्कोक कुलालाजाहिसूचके ’ इति मेदिनी । चित्रमेव सर्पस्य सुपर्णप्रणयत्वं गरुड़युक्तत्वम् । १२ जगत्प्राणधयी जगतां प्राणनाशकर्त्री । पक्षे जगत्प्राणो वायुः । ‘ जगत्प्राणः समीरण ’ इत्यमरः । १३ अस्या जगत्प्राणधयित्वात्तन्नाशे वायोरयं कृष्णो हितकारीति पूतनाशत्रुरिति सुकरम् । १४ गरलायतानि विषभरितानि । १५ विषधेः समुद्रस्य सुता लक्ष्मीः । १६ विभिन्ना विकलिताः समग्राः सर्वाः सन्धिबन्धा यस्याः । १७ चक्रवाले मनुष्यसमूहे ‘ चक्रवालं तु मण्डलं ’ इत्यमरः ।

